# Program outcomes

## शास्त्री – न्यायः

**फलितांशाः- (Outcomes)**

- शास्त्रस्यैतस्याध्येता प्राच्यनव्यन्यायतन्त्रोद्दिष्टदिशा पदार्थानां तत्वाध्ययनेन प्रपञ्चस्य प्रपञ्चस्थसमग्रवस्तूनां यथार्थस्वरूपं विकेकपुरस्सरं निश्चिनोति।
- प्राच्यभारतीयानां विज्ञानशास्त्रे (Science) कौशलं निरतिशयसूक्ष्मविचारपाटवञ्चाधिगच्छति।
- पारमाणुकारणतावादाध्ययनेन जगत्तद्वस्तूनाञ्च मूलकारणं निर्विचिकित्सितरूपेण अवगच्छति।
- सामान्यतः न्यायस्नातकोत्तीर्णता शिक्षाशास्त्री (B.Ed) अध्ययने योग्यतां प्रदधाति।
- न्यायशास्त्रे स्नातकोत्तीणः S.S.C, P.S.C, इत्यादि वृत्तिसंबद्धप्रतियोगितापरीक्षाणां लेखने तासु समुत्तीणतायाञ्च दक्षः सञ्जायते।
- न्यायशास्त्रे स्नातकोत्तीर्णः एव न्याये परस्नातककक्षाम् अथवा आचार्यकक्षां प्रवेष्टुम् अर्हः भवति।

## शास्त्री प्रतीष्ठा न्यायः

- पदार्थसाधर्म्यवैधर्म्याध्ययनेन कारणत्रयज्ञानेन च समग्रविश्वस्य निर्मलतथ्यधीः सञ्जायते। तथाऽर्जिततथ्यधीः पाश्चात्यदर्शनाध्ययने (Western Philosophy) एवं भारतीयशास्त्रान्तरा-ध्ययने असाधारणयोग्यतामादधाति।
- न्यायप्रतिष्ठाकक्षायां न्यायशास्त्रीयपत्रमेकमधिकमधीयते इत्यतः न्यायस्नातकोक्तफलेषु स्वतः दार्ढ्यं संपद्यते।
- शिक्षाशास्त्री अध्ययने न्यायाचार्याध्ययने च योग्यतां प्राप्नोति।
- R.R.B,वित्तकोशनियुक्तिपरीक्षेत्यादि (Banking Recruitment Board Examinations) लेखने समर्थः जायते।
- भारतीयसेनायां धर्मगुरुः इति स्थानप्राप्तिप्रवेशपरीक्षालेखने समर्थः भवति।

## आचार्यः - न्यायः

- प्रमित्यसाधारणनिदानभूतप्रमाणानि साङ्गोपाङ्गं वर्णयति प्रमाणाशास्त्रेऽमुष्मिन्नभ्यासः दुर्निर्णेयशास्त्रसन्दर्भे लोकव्यवहारे च प्रमायाः ( True Cognition) प्राप्तौ निरतिशयप्रावीण्यं विदधाति।
- आत्ममनसोः यथार्थतत्वधियं अवाप्य आधुनिकानां मनोतत्वाध्ययने (Metaphysics) दाक्षिण्यं जायते।
- एतच्छास्त्रप्रतिपादिततत्वावधारकदुरूहयुक्तीनां सतताभ्यासेन बुद्धेः शक्तिः अतिशयितरूपेण प्रवर्धते। इत्थं बुद्धिशक्त्या दृढसंस्कारयुक्तस्य समाजपरिष्कर्तुः जगत्कल्याणकाङ्क्षिणः मानवस्य निर्माणं भवति।
- न्यायशास्त्रे आचार्योत्तीर्णः अनायासेन (अल्पपरिश्रमेण वा) N.E.T, S.L.E.T इत्यादौ उत्तीणः भवति।
- आचार्यामधीत्य महाविद्यालयेषु विश्वविद्यालयेषु सहायकाचार्यस्थानं प्राप्तुं योग्यता जायते।
- न्यायशास्त्रे विद्यावारिधिं कर्तुं अर्हता प्राप्यते।

## विद्यावारिधिः

- कर्कशतर्कशास्त्रे विद्यावारिधिं समाप्य समाजे प्रतिष्ठां अतुलां लभते।
- न्यायशास्त्रे महाविद्यालयेषु विश्वविद्यालयेषु च सहायकाचार्यादिस्थानप्राप्तौ अवकाशः इतरापेक्षया दृढः जायते।
- विद्यावारिधिप्राप्ता एव वेतनवृद्धिं सहाचार्याचार्याद्युत्तरोत्तपदोन्नतिं च प्राप्नोति।
- उत्तरानुसन्धानस्थानं (Post Doctoral Research) प्राप्तुं योग्यता जायते।
- भारतीयदार्शिकानुसन्धानपरिषद् (I.C.P.R.) इत्यादि विविधसंस्थाभ्यः परियोजनाप्राप्तर्थं योग्यता संपद्यते।